# SHRI DIGAMBER JAIN ACHARYA SANSKRIT MAHAVIDYALAYA JAIPUR




www.jainsanskritcollege.com

## – ध्येय –

**संस्कृतेः संरक्षणं संस्कृतप्राकृतयोः चाभिवर्धनम्।**

विश्वस्य प्राचीनतमा भाषा, भारतस्य गौरवभूता भाषा, ज्ञानस्य सागरभूता भाषा, शुद्धा सुसंस्कृता भाषा, संस्कृतेः संरक्षिका भाषा, मानवमात्रस्य कल्याणजनयित्री भाषा, अपशब्दरहिता भाषा, वसुधैवकुम्बकमिति उद्घोषिका भाषा संस्कृतभाषास्तीति सर्वेषां मतिमताम् अनुभवः। सहैव प्राकृतभाषायामपि भारतस्य विविधज्ञानराशिः निबद्धो वर्तते। वर्तमाने अर्थप्रधानयुगे अर्थातिरिक्तं व्यर्थमिति उद्घोषयितुं संलग्नानां मध्ये प्राचीनयोः उभयोः भाषयोः संरक्षणं परमावश्यकं तदर्थं संलग्नोऽयं महाविद्यालयः।

## – दृष्टिः –

संस्कृतप्राकृतभाषयोः निहितं ज्ञानं समाजाय उपयोगी भवतु तदर्थं दिवानिशं प्रयासः, संस्कृतप्राकृतभाषयोः सम्बन्धः सामान्यजनस्य भवतु तस्मै प्रयत्नः, संस्कृतप्राकृतभाषायाः विकासः कथं भवेत् कथमिमे भाषे विश्वस्तरे गच्छेताम् तदर्थं प्रयत्नः, इत्यादिदृष्टयः सन्ति महाविद्यालयस्य। अस्मिन्नेव क्रमे संस्कृतप्राकृतभाषयोः विशिष्टयोगदानस्य कृते एकपञ्चाशत् सहस्रराशिभिः विदुषां प्रोत्साहनमपि महाविद्यालयेन क्रियते। अत्रत्याः छात्राः समाजे गत्वा संस्कृतप्राकृतविषये सर्वान् सामाजिकान् उद्बोधयन्तीति विशेषः।

## –लक्ष्यम् –

- प्राचीनस्य ज्ञानविज्ञानस्य संरक्षणम्।
- संस्कृतप्रकृतक्षेत्रे नवाचाराणाम् अनुसन्धानम्
- प्राकृतसंस्कृतभाषयोः विद्यमानस्य चतुर्विधपुरुषार्थप्राप्त्युपायस्य अनुसन्धानम्
- सामाजिकानां जीवनशैली उत्तमा कथं भवेदिति अनुसन्धानम्
- संस्कृतप्राकृतयोः विद्यमानस्य सामाजिकस्वरस्य अनुचिन्तनम्
- मानवमूल्यविकासाय समागतस्य ज्ञानविज्ञानस्य अनुसन्धानम्
- आधुनिकैः गतिविधिभिः सह संस्कृतप्राकृतयोः सम्बन्धस्थापना
- संस्कृतप्राकृतभाषयोः प्रचारः प्रसारश्च
- प्राचीनाधुनिकशिक्षणपद्धत्योः गवेषणम्
- संस्कृतप्राकृतभाषयोः लोके व्यवहारः कथं भवेदिति उपायानुकथनम्
- संस्कृतप्राकृतविदुषां निर्माणम्
- शिक्षाप्रदानेन सह चरित्रनिर्माणम्
- इत्यादीनि अनेकानि लक्ष्यानि क्रोडीकृत्य महाविद्यालयः स्वकार्ये संलग्नः अस्तीति।

प्राचार्य
श्री दिगम्बर जैन आचार्य संस्कृत महाविद्यालय
जैन नसियाँ रोड, साँगानेर, जयपुर-29 (राज.)